# कृतज्ञताज्ञापनम्

नेत्ररूपस्य ज्योतिषशास्त्रस्य महत्त्वपूर्णं विषयं “ज्योतिषीयहोरासन्दर्भे नवमांशवर्गस्य विशिष्टमध्ययनम्” अवलम्ब्य शोधप्रबन्धसम्पूर्तये मूलकारणानि बहूनि सन्ति, तत्रादौ गणेशाम्बिकां जगज्जननीं कुलाम्बां च सश्रद्धया प्रणम्य सर्वेभ्यो कार्त्तज्ञं वितीर्यन्ते। अथ कृतज्ञताज्ञापनोपक्रमे वन्दनपूर्वकं विष्णुप्रसादः डी. शर्मा स्वमातृ-पितृचरणकमलेभ्यश्च कोटिशः प्रणामाः विनिवेदयते । अथ च शोधविषयेऽस्मिन् अनुसन्धानं चिकीर्षितवते मह्यं स्वज्ञानकौशलवैभवेन शोधमार्गदर्शनं विधाय संस्कृतसाहित्यप्रवीणानां स्वाभिनववैज्ञा-निकदृष्ट्या सर्वदाभिनवत्वसम्पादने प्रेरयतां गुरुवर्याणां डॉ.हरिप्रसाद पाण्डेय,डॉ.रामपाल शुक्ला, डॉ.योगेशकुमार: त्रिवेदीमहोदयानां चरणारविन्दे प्रणामपुरस्सरं कार्तज्ञं व्याहरामि । अस्मिन्नेव क्रमे शोधप्रबन्धे स्वानुभवेन सर्वविधसाहाय्यं सम्पादयतां सर्वेषां गुरुवर्याणामपि कार्तज्ञं व्याहरामि। अवसरेऽस्मिन् विश्वविद्यालयस्य सर्वेषां पुस्तकालयसङ्गणकालयादीनां कर्मचारिणाम् अनुसन्धानविभागस्य प्राशासनिकान् च कृते धन्यवादान् प्रयच्छामि । अथ कृतज्ञोऽहं समेषां ग्रन्थटीका-भाष्यकतृणां, पत्रिकासम्पादकानाञ्च येषां कृतिभ्यः मया प्रतिपदे साहाय्यमधिगतम् । मुद्रणं विना सर्वमपूर्णमतः शोधप्रबन्धस्य गणित-फलित-प्रभृतिविषयाणां टङ्कणकार्यसम्पादनद्वारा शोधप्रबन्धमिमं मूर्तरूपप्रदायकाय कृतज्ञतां ज्ञापयामि। शोधकार्यमिदं सर्वेषां प्रत्यक्षाप्रत्यक्षघटकानां सहयोगेन प्रपूर्णमतः सर्वेभ्यः हार्दिकी कृतज्ञतां प्रनामाञ्जलिं च विनिवेद्य विरम्यते।

**शोधार्थी**

विष्णुप्रसादः डी. शर्मा

श्री: गणेशाय नम:

प्रातः स्मरामि गणनाथमनाथबन्धुं ।
सिंदूरपूरपरिशोभितगंडयुग्मम् ।।
उद्दण्डविघ्नपरिखंडनचंडदंड-
माखण्डलादिसुरनायकवृन्द वन्धम् ।।

